निर्मलं च मनो भूत्वा पुनर्जन्म न विद्यते ॥

End:

श्रीभगवानुवाच—

शुद्धात्मा तपसा निष्ठा ज्ञानाग्निर्मलनाशनम् ।
मनश्शुद्धं गुरोर्वाक्यं पुनर्जन्म न विद्यते ॥

अर्जुनः—

योगिकर्म अकर्म च ज्ञानस्याभ्यासनं कृतम् ।
ब्रह्माग्निर्भजते बीजमबीजं योगिनो भवेत् ॥

योगिनां सहजानन्दं जन्ममृत्यु न वाञ्छितम् ।
विधिनिषेधरहितमबीजं योगिनो भवेत् ॥

हरिः ओं तत्सदिति श्रीमद्गर्भगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सर्वशास्त्रार्थप्रतिपादकज्ञानसारे मोक्षयोगे अष्टाङ्गयोगसारे परमगुह्ये गर्भगीता नाम पूर्णोऽध्यायः ।

No. 2415. गर्भगीता.

GARBHAGĪTĀ.

Page, 1. Lines, 8 on a page.

Begins on fol. 21*b* of the MS. described under No. 2014.

Complete.

Same work as the above.

No. 2416. गर्भगीता.

GARBHAGĪTĀ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 6*a* of the MS. described under No. 2372.

Same work as the above.

No. 2417. गुरुगीता.

GURUGĪTĀ.

Substance, palm-leaf. Size, 9½ × 1⅛ inches. Pages, 39. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vīraśaiva-Guru-paramparā 1*a*, Saundaryalaharī 21*a*.

Complete in 4 Adhyāyas.

A portion of the Skāndapurāṇa, Uttarakhaṇḍa.

It treats of the greatness and holy importance of the spiritual preceptor.

The contents of the Adhyāyas are :—

१. गुरुधर्मयोगः ; २. गुरुभक्तियोगः ; ३. परप्राप्तियोगः ; ४. परमरहस्योपदेशयोगः.

Described in No. 123 of the Bodleian Library Catalogue.

Beginning :

विश्वेश्वरसमारम्भामेकोरामार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥
श्रीमद्विश्वेश्वरगुरुं चैकोरामगुरूत्तमम् ।
वीरेशाराध्यसत्पुत्रं वीरभद्रकवीश्वरम् ॥
वीरनाराध्यमतुलं माणिक्याराध्यदेशिकम् ।
माणिक्याराध्यसत्पुत्रं श्रीमद्धरितगोत्रजम् ॥
अन्नपूर्णागर्भको(गो)ळशुक्तिसम्पुटमौक्तिकम् ।
मल्लं पल्यन्वयाम्भोधिराकाराजत्सुधाकरम् ॥
बुच्चय्याराध्यमतुलं पूर्णचन्द्रसमाननम् ।
भस्मनिष्ठापरं शान्तं तपसामेकपञ्जरम् ॥
तत्तपोजःपरिणतं परिपूर्णफलं यथा ।
सञ्जातं गुरुमूर्तिं च सद्गुरूणां शिखामणिम् ॥

वीरमल्लेश्वराराध्यवरहस्ताम्बुजोद्भवम् ।
माहेश्वरपदाम्भोजषट्पदं षट्स्थलान्वितम् ॥

लिङ्गाङ्गसङ्गिनं संविल्लिङ्गपूजापरायणम् ।
श्रीमत्षडक्षरीमन्त्रजपमालाविभूषितम् ॥

भस्मत्रिपुण्ड्रविलसत्फालभागविराजितम् ।
सर्वावयवसंराजद्रुद्राक्षाभरणैर्युतम् ॥

सर्ववेदागमाभ्यासशैवज्ञानसमन्वितम् ।
स्वशिष्यत्हृदयाम्भोजमरन्दपमधुव्रतम् ॥

निजलिङ्गार्चनानन्दकेळीलालसवैभवम् ।
तत्प्रसादोपबोधैकनिष्ठाचतुरशीलिनम् ॥

* * * *

अस्मद्गुरुमहं वन्दे सर्वमङ्गळदायकम् ।

अस्य श्रीगुरुगीताशास्त्रमहामन्त्रस्य, श्रीसाम्बशिव ऋषिः, नानाविधच्छन्दांसि, श्रीगुरुर्देवता, विनियोगः ।

* * * *

न्यास—

हंसाभ्यां परिवृत्तपत्रकम . . . . गुरुम् ॥

* * * *

साक्षिणं प्रत्यगानन्दं तं चरन्तं सदाशिवम् ।

सूत उवाच—

कैलासशिखरे रम्ये भक्तानन्दप्रदायकम् ।
प्रणम्य पार्वती भक्त्या शङ्करं परिपृच्छति ॥

पार्वत्युवाच—

ओन्नमो देवदेवेश परात्पर जगद्गुरो ।
सदाशिव महादेव गुरुदीक्षां प्रदेहि मे ॥

* * * *

कृपया ब्रूहि मे देव नमामि चरणे तव ।

ईश्वर उवाच—

मम रूपासि देवि त्वं तद्भक्त्या तं वदाम्यहम् ।
लोकोपकारकः प्रश्ने(श्नो) न केनापि कृतः पुरा ॥

End:

तद्भक्ता च क(ख)लं धूर्तं पाषण्डं नास्तिकं प्रियम् ।
मनसापि न वक्तव्या गुरुगीता कदाचन ॥

अतीव चित्तपक्वस्य श्रद्धाभक्तस्य देहिनः ।
वक्तव्यं तदिदं देवि अन्यथा नैव सिध्यति ॥

Colophon:

इति श्रीस्कान्दपुराणे उमामहेश्वरसंवादे परमरहस्योपदेशयोगो नाम चतुर्थोऽध्यायः ॥

No. 2418. गुरुमाहात्म्यम्.

GURUMĀHĀTMYAM.

Substance, palm-leaf. Size, $11\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 7. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, new.

Complete.

Begins on fol. 35*a*. The other works herein are Ardhanārīśvarāṣṭaka 1*a*, Viśvanāthāṣṭaka 2*a*, Liṅgāṣṭaka 3*a*, Namaśśivāṣṭaka 4*a*, Śivapañcacāmarāṣṭaka 6*b*, Paulastyāṣṭaka 8*a*, Ṣaḍgurustōtra 9*a*, Mahimnasstava 9*b*, Śivastuti 14*b*, Haraguṇamālā 22*a*,

Rāvaṇapañcacāmarastōtra 25*a*, Pañcaratnastōtra 27*a*, Vyāsāṣṭaka 28*a*, Aparādhastōtra 29*b*, Namaśśivāṣṭaka 33*b*, Pañcaprakāśagadya 39*a*, Basavagadya 45*a*, Namskāragadya 46*b*, Muktapadagrasta 50*b*, Mārkaṇḍēyastōtra 53*b*, Śivadvādaśanāmastōtra 54*a*, Maṅgalastōtra 54*b*, Tanmātraliṅga 56*a*, Jaṅgamaliṅgastōtra 5[illegible]*b*, Namaskārāṣṭaka 63*a*, Śivastōtra 64*b*, Namaśśivāṣṭaka 65*b*, Śivastuti 67*b*, Viśvanāthāṣṭaka 69*a*, Ardhanārīśvarāṣṭaka 72*a*, Kālabhairavastōtra 73*a*, Pradōṣakālastava 74*a*, Kṣētrapālastōtra 75*b*, Śivaliṅgastōtra 78*b*, Śaṅkarāṣṭaka 79*a*.

Similar in spirit and purpose to the work described above.

Beginning:

कैलासशिखरे रम्ये भक्तिसन्धाननायकम् ।
प्रणम्य पार्वती भक्त्या शङ्करं परिपृच्छति ॥

देव्युवाच—

भगवन्सर्वधर्मज्ञ व्रतिनां व्रतनायकम् ।
ब्रूहि मे कृपया देव गुरुमाहात्म्यमुत्तमम् ॥

ईश्वर उवाच—

यो गुरुस्स शिवः प्रोक्तो यः शिवः स गुरुस्स्मृतः ।
भक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ॥
चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
नादबिन्दुकलातीतं तस्मै श्रीगुरवे नमः ॥

End:

प्राणेन लिङ्ग(ङ्गं)संयुक्तं लिङ्गं प्राणेन संयुतम् ।
प्राणेन त्यक्तकाले च तद्देहं दहन(देह)वर्जितम् ॥
दग्धस्य दहनं नास्ति पा[त]कस्य पचनं न हि ।
ज्ञानाग्निदग्धदेहस्य न च दग्धं न च क्रिया ॥

Colophon:

इति श्रीगुरुमाहात्म्ये मङ्गलमहा श्री.

No. 2419. गुरुमाहात्म्यम्.

GURUMĀHĀTMYAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under No. 831.

Incomplete.

Same work as the above.

No. 2420. गोपिकागीता.

GŌPIKĀGĪTĀ.

Substance, paper. Size, $10\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 4. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Sannidhikīrtanastōtra 3*a*, Gītagōvinda 13*a*.

Complete

This forms the 31st Adhyāya, in Skandha X, of Bhāgavata, and is a song of love and praise in honour of Kṛṣṇa by the Gōpis.

Beginning:

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ।
दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥
शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ॥

End:

यत्ते सुजातचरणाम्बुरुहं स्तनेषु
भीताश्शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद्व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥
इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ।
रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥

तासामाविरभूच्छौरिस्स्मयमानमुखाम्बुजः ।
पीताम्बरधरस्स्रग्वी साक्षान्मन्मथमन्मथः ॥

No. 2421. गोपिकागीता.

GŌPIKĀGĪTĀ.

Substance, palm-leaf. Size, 11¼ × 1¼ inches. Pages, 4. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol 1*a*. The other works herein are: Vaidyaviṣaya 4*a*, Dēvīstuti 12*a*, Gaṅgāstuti 18*a*, Gaṅgārādhana 20*b*, Punassandhāna 36*a*, Aparaprayōga (Tel.) 44*a*, Sīmantinīmaṅgalāṣṭakādi 121*a*, Pañcadaśaprakaraṇaślōka Savyākhyāna 133*a*, Pañcīkaraṇasurēśvaravārtika 137*a*, Bhadrakālyādiyantra 138*a*, Vaidyaviṣaya 140*a*, Vandīstōtrādi 143*a*, Vīrabhadrayantrādi 143*a*, Pañcīkaraṇa 147*a*, Mānasastōtra 148*a*, Dvādaśaślōkī 148*b*, Rāmastuti 151*a*, Vighnēśvarādistuti 152*b*, Ādityakavaca 153*b*, Kṛṣṇakavaca 154*a*.

Complete

Same work as the above

No. 2422. गोपिकागीता.

GŌPIKĀGĪTĀ.

Substance, palm-leaf. Size, 17⅛ × 1¼ inches. Pages, 4. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 9*a*. The other works herein are: Nigamāntāryacūrṇikā 1*a*, Sudarśanāṣṭaka 3*a*, Yathōktakāristōtra 4*a*, Vyāsaviṁśati 5*a*, Raghuvīragadya 11*a*, Yajñōpavītapratiṣṭhā 15*a*, Śaraṇāgatidīpikā 17*a*, Dramiḍōpaniṣadvivaraṇa 23*a*.

Complete.

Same work as the above.

No. 2423. गोपिकागीता.

GŌPIKĀGĪTĀ

Substance, palm-leaf. Size, $6\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 6. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 5*a*. The other works herein are Mahāvākyamantra 1*a*, Śivamānasikapūjā 3*a*, Gītāsāra 8*a*.

Complete.

Same work as the above.

No. 2424. गोपिकागीता.

GŌPIKĀGĪTĀ.

Substance, palm-leaf. Size, $9\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 4. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 54*a*. The other works herein are: Āñjanēyamantra 1*a*, Prāṇapratiṣṭhāmantra 2*a*, Pañcamukhavidāraṇahanūmanmantra 4*a*, Kālīmantra (Tamil) 12*a*, Digbandhanamantra 16*b*, Annapūrṇābhuvanēśvarīmantra 22*a*, Subrahmaṇyamantra 23*a*, Mahāśāstā mantra 25*a*, Manmathamantra 26*a*, Vanadurgāmantra 28*a*, Baḍabānalabhairavamantra 30*b*, Hanumatkavaca 32*a*, Nīlakaṇṭhamantra 37*a*, Śarabhamālāmantra 42*a*, Aghōravīrabhadramahāmantra 43*a*, Aghōramantra 46*a*, Vakuḷābharaṇastōtra 51*a*.

Incomplete

Same work as the above

No. 2425. गोवर्धनगिरिमाहात्म्यम्.

GŌVARDHANAGIRIMĀHĀTMYAM.

Substance, paper. Size, $8\frac{3}{4} \times 4\frac{1}{2}$ inches. Pages, 49. Lines, 9 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Adhyāyas 1 to 11.

Begins on fol. 26*a*. The other works herein are: Bhaktihētu-nirṇaya 1*a*, Bhaktihētuvivṛti 10*b*.

A portion of Gargācāryasaṁhitā in Girirājakhaṇḍa. It treats of the holiness and greatness of the Gōvardhana mountain and gives the story of Kṛṣṇa's lifting it up.

The subject-matter of the chapters as found in the colophons is as follows:—

१. गिरिराजपूजाविधिवर्णनम्; २. गिरिराजमहोत्सववर्णनम्; ३. गोवर्धनोद्धारणम्; ४. कृष्णाभिषेकवर्णनम्; ५. गोपविवादः; ६. हरिपरीक्षणम्; ७. गिरिराजतीर्थवर्णनम्; ८. गिरिराजविभूतिवर्णनम्; ९. गिरिराजोत्पत्तिवर्णनम्; १०. गिरिराजमाहात्म्यम्; ११. गिरिराज-प्रभावे सिद्धमोक्षात्मनः प्रस्तावर्णनं.

Beginning :

श्रीबहळाश्व उवाच—

कथं दधार भगवान् गिरिं गोवर्धनं वरम् ।
उत्सिञ्जि(च्छिली)न्ध्रं यथा बालो हस्तेनैकेन लीलया ॥
परिपूर्णतमस्यास्य श्रीकृष्णस्यामलात्मनः ।
वदैतच्चरितं दिव्यमद्भुतं मुनिसत्तम ॥

श्रीनारद उवाच—

वार्षिक्यं(कं) हि करं राज्ञे यथा शक्रा(य)वै तथा ।
बलिं ददुः प्रावृडन्ते गोपास्सर्वे कृषीवलाः ॥
महेन्द्रयागसम्भारचयं दृष्ट्वा तदा हरिः ।
नन्दं पप्रच्छ सदसि वल्लभा(वा)नाञ्च शृण्वताम ॥

श्रीभगवानुवाच—

कस्यापि पूजनं ह्येतत् किं फलञ्चास्य विद्यते ।
लौकिकञ्च वदन्त्येनमथवा पारलौकिकम् ॥

* * * *

Colophon :

इति श्रीमद्गर्गाचार्यसंहितायां श्रीगिरिराजखण्डे नारदबहळाश्वसंवादे श्रीगिरिराजप्र(पू)जाविधिवर्णनो(नं) नाम प्रथमोऽध्यायः ॥

End :

विप्रोऽपि तस्मात्पुनरागतो गिरिं गोवर्धनं सर्वगिरीन्द्रदैवतम् ।
प्रदक्षिणीकृत्य पुनः प्रणम्य तं ययौ गृहं मैथिल तत्प्रभाववित् ॥
इदं मया ते कथितं प्रचण्डं सुमुक्तिदं श्रीगिरिराजखण्डम् ।
श्रुत्वा जनः पापपरोऽपि चण्डं स्वप्ने न पश्येद्यममुग्रदण्डम् ॥
यश्शृणोति गिरिराजयशस्यं गोपराजनवकेळिरहस्यम् ।
देवराज इव सोऽत्र शमेति नन्दराज इव शान्तिममुत्र ॥

Colophon :

इति श्रीमद्गर्गाचार्यसंहितायां श्रीगिरिराजखण्डे श्रीनारदबहळाश्वसंवादे श्रीगिरिराजप्रभावप्रस्तावर्णनो(नं)सिद्धमोक्षात्मनो नामैकादशोऽध्यायः ॥

श्रीगोवर्धनगिरिमाहात्म्यं समाप्तम् ॥

No. 2426. चातुर्मास्यमाहात्म्यम्.

CĀTURMĀSYAMĀHĀTMYAM.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 131. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 27.

This is a portion of the Varāhapurāṇa.

It treats of the sanctity of the four months, Śrāvaṇa, Bhādrapada, Āśvayuja and Kārtika, and of the great merit

attaching to religious and devotional performances conducted during those months.

Beginning:

सूत उवाच—

इत्युक्ता कालरूपेण धरणी हरिणा तथा ।
पुनः पप्रच्छ तं देवं प्रणमन्ती मुहुर्मुहुः ॥

धरण्युवाच—

त्वन्मुखाच्च तथान्येभ्यो नारदादिभ्य एव च ।
श्रुत्वैवं निश्चयं चक्रुः शिवशक्रादयोऽपरे ॥
मुनयो देवगन्धर्वाः यक्षराक्षसपन्नगाः ।
नृणां त्वद्भक्तिरेवैका भवबन्धविमोचनी ॥
नान्यः पन्था भवेत्क्वापि मुमुक्षूणां भवार्णवात् ।
त्वं सर्वदेवानिवहस्य रमास्वयंभु(भू)-
शर्वादिकस्य गतिरो(दो) जनको नियन्ता ।
पाता द(त)थैव शमितासि परान्तकाले
शश्वत्त्वमेवं निखिलेऽत्र चराचरेऽसि ॥

End:

धरण्युवाच—

धन्यास्म्यनुगृहीतास्मि श्रुतवत्यस्मि ते मुखात् ।
चातुर्मास्यस्य माहात्म्य[ा](मिदं गुह्यत)मं विभो ॥
इदानीं श्रोतुमिच्छामि यथा वृत्रो हतः पुरा ।
शक्रेण तन्ममाचक्ष्व विस्तरान्मधुसूदन ॥
(न हि)तृष्वा(प्या)मि देव(वे)श शश्रुण(श्रृण्वती) त्वन्मुखाम्बुजात् ,
कथा विचित्रा गुह्याश्च याश्च कैरपि न श्रुता(ः) ॥

Colophon :

इति श्रीवराहपुराणे चातुर्मास्यमाहात्म्ये श्रीधरणीवराहसंवादे सप्त-विंशोऽध्यायः ॥

No. 2427. चातुर्मास्यमाहात्म्यम्.

CĀTURMĀSYAMĀHĀTMYAM.

Substance, palm-leaf. Size, $18\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages. 130. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 27.

Same work as the above.

No. 2428. चित्रकेतूपाख्यानम्.

CITRAKĒTŪPĀKHYĀNAM.

Substance, paper. Size, $8\frac{7}{8} \times 4\frac{5}{8}$ inches. Pages, 9. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 31*a* of the MS. described under No. 2398.

These two Adhyāyas relating the story of Citrakētu are the 15th and 16th Adhyāyas of the 6th Skandha in Bhāgavata.

The date of copying is given as Friday the 10th of Māgha-Śuddha in the year Viṣu.

Beginning :

चित्रकेतुः—

कौ युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसाम् ।
अवधूतेन वेषेण गूढाविह समागतौ ॥

चरन्ति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः ।
मादृशां ग्राम्यबुद्धीनां बु(बो)धायोन्मत्तालिङ्गिनः ॥
कुमारो नारदमुनिराङ्गिरा देवलोऽसित ।

End:

त्वमेवं श्रद्धया राजन्नप्रमत्तो वचो मम ।
ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यसि ॥

श्रीशुकः—

आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः ।
पश्यतस्तस्य विश्वात्मा तत्रैवान्तर्दधे हरिः ॥

Colophon:

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे षोडशोऽध्यायः ॥

Before the beginning of the Citrakētūpākhyāna, there are a few passages taken from the 9th Adhyāya of Skandha, VI which purport to be a hymn of praise uttered by the Dēvatās in honour of the Supreme Being. It begins thus:

श्रीशुकः—

इति तेषां महाराज सुराणामुपतिष्ठताम् ।
प्रतीच्यां दिश्यभूदाविः शङ्खचक्रगदाधरः ॥
आत्मतुल्यैष्षोडशभिर्विना श्रीवत्सकौस्तुभौ ।
पर्युपासितमुन्निद्रशरदम्बुरुहेक्षणम् ॥

It ends:—

हंसाय दह्रनिलयाय निरीक्षकाय
कृष्णाय मृष्टयशसे निरुपक्रमाय ।
सत्सङ्ग्रहाय भवपान्थनिजाश्रमाय
शश्वद्धरिष्ठगतये हरये नमस्ते ॥

No. 2429. चिदम्बरमाहात्म्यम्.

CIDAMBARAMĀHĀTMYAM.

Pages, 90. Lines, 23 on a page.

Begins on fol. 1*a* of the MS. described under No. 2357.

Adhyāyas 1 to 26. This is a portion of the Skāndapurāṇa. It treats of the holiness of Cidambara—Chidambara in the South Arcot district of the Madras Presidency—and its Śaiva shrine, and is introduced as a conversation between Mahēśvara and Nandi.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ।
प्रथमापत्यसौभाग्यं पार्वतीपरमेशयोः ।
भजे गजेन्द्रवदनं प्रत्यूहव्यूहशान्तये ॥

* * * *

यस्मात्सर्वं समुत्पन्नं चराचरमिदं जगत् ।
इदं नमो नटेशाय तस्मै कारुण्यमूर्तये ॥
ऋषयो नैमिशारण्ये सर्वसंपत्समन्विते ।
निवसन्ति स्म विमले चरन्तो दुष्करं तपः ॥
विवृण्वन्तः परं ब्रह्म नित्यमानन्ददायकम् ।
निदानं सर्वलोकानां भवभीतिनिवारणम् ॥

* * * *

यस्याः स्मितप्रभा देव्या लोकमौक्तिकदीपिका ।
या देवी परमानन्दा चन्द्रोदयविभावरी ॥
लभ्यते सकला संपद्यस्याः कारुण्यवीक्षणात् ।
शिवपूर्वपदा नाम्ना भवानी कामसुन्दरी ॥

चिदम्बराभिधानस्य स्थानवर्यस्य वैभवम् ।
महाभागो महेशोऽपि भगवान्वेत्ति वा न वा ॥
अष्टादशपुराणेषु यत्पुराणं परं मतम् ।
भुक्तिदं मुक्तिदञ्चैव शृण्वतामघनाशनम् ॥
इदं चिदम्बरोत्पन्नं पुराणं नन्दिकेश्वरः ।
उमानाथमुखाश्रु(च्छु)त्वा पुरा ब्रूते महामतिः ॥
सनत्कुमारमुनये कथयामास विस्तरात् ।

End:

एवन्तीर्थविधिं कृत्वा देवदेवं नटेश्वरम् ।
सभां प्रवेशयामासुः अलङ्कारैरनिन्दितैः ॥
इति सुरगुरुतुल्यैरितल्लकारण्यविप्रैः
सकलनिगमपारावारपारीणचित्तैः ।
फणिकुलतिलकेन व्याघ्रपादेन चापि
प्रतिदिनमुपचारैः अर्चितोऽभून्नटेशः ॥

अध्यायमेतं य इमे पठन्ति शृण्वन्ति नन्दन्त्यथवा लिखन्ति ।
तेषामसौ स्वर्णसभाधिनाथः सायुज्यमिष्टञ्च फलन्ददाति ॥

Colophon :

इति श्रीमत्स्कान्दे महापुराणे चिदम्बरमाहात्म्ये हेमवर्मणा रथोत्सवानन्द(न्त)रतीर्थविधिविधानं नाम षड्विंशोऽध्यायः ॥

यश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।
तयोस्संस्मरणात्पुंसां सर्वतो जयमङ्गलम् ॥

The following is the subject-matter of the various chapters herein :—

१, २, ३, ४.—
५. द्विजेन्द्रप्रशंसा.
६. व्याघ्रपादोत्पत्तिः.

७. वासवतपस्सिद्धिकथनम्.

८. व्याघ्रपादतपःप्रभावः.

९. व्याघ्रपादवरलाभः.

१०. व्याघ्रपादचरितम्.

११. भिक्षाटनप्रसङ्गः.
(माधवशेषसंवादे).

१२, १३, *ibid.*

१४. (महेश्वरशेषसंवादः).

१५. पतञ्जलितिल्लवनप्राप्तिः.

१६. व्याघ्रपादपतञ्जलिसंयोगः.

१७. आनन्दताण्डवदर्शनम्.

१८. आनन्दप्रशंसा.

१९. ब्रह्मणः तिल्लवनप्राप्तिकथनम्.

२०. हिरण्यवर्मकिरातसंवादः.

२१. हिरण्यवर्मतिल्लवनप्राप्तिः.

२२. हिरण्यवर्मवरलाभः.

२३. चिदम्बरस्थलप्रदर्शनम् (व्याघ्रपादहिरण्यवर्मसंवादः).

१४. हिरण्यवर्मचरित्रकथनम्.

१५. महोत्सवविधिः.

१६. हेमवर्मणा रथोत्सवानन्तरतीर्थविधिविधानम्.

No. 2430. ताम्रपर्णीमाहात्म्यम्.

TĀMRAPARṆĪMĀHĀTMYAM.

Substance, paper. Size, 13⅜ × 8½ inches. Pages, 669. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 64.

This is a work on the sanctity of the river Tāmraparṇī in the Tinnevelly district of the Madras Presidency. It is said to be a portion of the Śiva-Purāṇa, and contains sixty-four chapters. The poem mentions the following kings and celebrated persons and places on the pages marked opposite to them :—

	Pages.
Vīrasēna	60–63
Do.	92
Śaṅkharāja	108
Pāṇḍyarāja	181
Vikrāntakēsarin and his two sons Vaijayanta and Jayanta.	184
Nāgakētu, king of the country of Kuntala ..	224
Vasumanas, the grandson of Yayāti by his daughter	224
Yādava kings	226
Gaṇḍūla, a town	227
Vasumanas	229
Agnivarṇa, king of Benares..	291
Maṇigrīva, son of Kubēra	307
A Pāṇḍya king named Prasāda Candra ..	362
A Nāga king named Maṇidhvaja of the town of Maṇalūru (மணலூரு)	363
Malayadhvaja Pāṇḍya	397
Sundara Pāṇḍya	402
Kumbhāṭaka	425
Mahābali	446
Ṣaḍjapāla	454
Purañjaya	515
Śrutakīrti	518
Purudhāman	520
Bhīmaśāsana	535
Dhanakētu	537

Beginning:

वन्दे सन्ततदानेशं साम्बं शालिवृतीश्वरम् ।
शान्तं प्रसन्नवदनं चन्द्रार्धकृतशेखरम् ॥
अखण्डपरमानन्दपरिपूर्णात्ममूर्तये ।
निर्गुणाय गुणाविष्टकर्मणे ब्रह्मणे नमः ॥
यद्वचःकणिका वेदा यल्लीलाकणिका जगत् ।
यत्प्रभाबिन्दुरिन्द्राद्याः नमस्तस्मै परात्मने ॥
पुरा विधात्रा ब्रह्माण्डकुहरीगृहमेधिना ।
लीलया कलिता कापि तपस्सीमा तपस्विनाम् ॥
भूरेषा भूतिजननी पुरातनकृताश्रया ।
जायते नैमिशाभिख्या विख्याता जगतीतले ॥
पापानामूषरक्षेत्रं पुण्यानामुदयस्थलम् ।
आनन्दानामिवाधान(र)माश्चर्याणामिवाकरम् ॥
नैमिशं मुनिशार्दूलैः समन्तादुपसेवितम् ।
तत्र सर्वे मुनिगणा मिलिता धर्मचारिणः ॥
काङ्क्षन्तः परमां सिद्धिं सत्रं द्वादशवार्षिकम् ।
यज्वानं शौनकं कृत्वा चक्रुरक्रोधमध्वरम् ॥
तावदभ्याययौ श्रीमान् सूतः पौराणिकोत्तमः ।
ददर्श महतीं शालां तपसा निर्मितां शुभाम् ॥
हूयमानैर्हव्यवाहैः प्रफुल्लाशोकमालिकाम् ।
आस्तीर्णां कुशसङ्घातैः कौशेयाम्बरधारिणीम् ॥
श्रीमदुत्तरवेद्यास्यां यूपसीमन्तपद्धतिम् ।
शामित्राध्वर्युणा बाहुयुगलीं कलशस्तनीम् ॥
वेदिमध्यां धूमकेशीं संभाराभरणोज्ज्वलाम् ।
एवंभूतां चित्ररूपां क्रतुलक्ष्मीमित(व)स्थिताम् ॥

शालामालोकयन्नग्रे मूर्ध्ना मुकुलिताञ्जलिः ।
विनयादुपसृत्यैतान् क्रमादेवाभ्यवादयत् ॥

* * * *

ऋषयः—

स्वागतं ते महाभाग दृष्टोऽसि चिरकालतः ।
काश्च वै सरितः पुण्याः त्वया दृष्टाः परिष्कृताः ॥
कानि पुण्यानि तीर्थानि स्नातानि नियतात्मना ।
कुतः समागतोऽसि त्वं किं वा दृष्टमिहाद्भुतम् ॥

* * * *

सूतः—

नमो वो ब्रह्मवादिभ्यो महद्भ्यः सततं नमः ।
विनिष्क्रम्य महाक्षेत्रात् नरनारायणालयात् ॥
तीर्थदर्शनकामेन मया सञ्चरिता मही ।
दृष्ट्वा क्षेत्रानि(णि) पुण्यानि तीर्थानि विविधानि च ॥
गत्वा च दूरमध्वानं मया विश्रान्तिमेयुषा ।
अक्षिप्राहुणिका जाता पाण्ड्यगुप्ता महानदी ॥

* * * *

ताम्रपर्णीति विख्याता प्रयाति वरुणालयम् ।
स्मरणाद्दर्शनाद्भ्यनात् स्नानात्पानादपि ध्रुवम् ॥
कर्मविच्छेदिनी सर्वजन्तूनां मोक्षदायिनी ।

* * * *

सूतः—

शृण्वन्तु ऋषयः सर्वे प्रभावं कुम्भजन्मनः ।
महादेव्याश्च चरितं ताम्रायाः परमाद्भुतम् ॥

End:

यः शृणोति सदा भक्त्या तमेनं सर्वसम्पदः ।
स्वयमायान्ति विप्रेन्द्र नात्र कार्या विचारणा ॥

यस्तु साक्षात्स्वयं शम्भुः यस्तु साक्षात्स्वयं हरिः ।
लोपामुद्रापतिः सोऽयं नित्यप्रीतिसमन्वितः ॥
सान्निध्यं कुरुकेतूनां (तेनूनं)पठेद्यत्र कथामिमाम् ।
तस्मात्सर्वगुरोरस्य प्रसादाय दिनेदिने ॥
श्रोतव्यं पठितव्यं हि ब्राह्मणेन विजानता ।
यस्त्वैतद्भगवत ईश्वरस्य विष्णो-
र्वीर्याढ्यं वृजिनहरं सुमङ्गलं च ।
आख्यानं पठति श्रु (शृ)णोत्यनुस्मरेद्वा
दुष्कीर्तिं दुरितमपोह्य याति शान्तिम् ॥

Colophon:

इति श्रीमच्छैवपुराणे उपरिभागे तीर्थक्षेत्रवैभवखण्डे ताम्रपर्णीमाहात्म्ये ताम्रासागरसङ्गमुखमाहात्म्यवर्णनं नाम चतुःषष्टितमोऽध्यायः ॥

This Māhātmya treats of the following subjects:—

१. पार्वतीपरमेश्वरविवाहः.
२. विवाहकाले अगस्त्यस्य दक्षिणदिग्यानम्.
३. अगस्त्येन दत्तायाः ताम्रपर्ण्या मलयस्य पुत्रीत्वेन स्वीकरणम्.
४. अगस्त्यस्य सर्ववैष्णवजयः.
५. देव्याः उदुम्बरहननम्.
६. अगस्त्यस्य ताम्रपर्णीस्तोत्रमत्र्याश्रमगमनं च.
७. अगस्त्यदर्शनात् वज्राङ्गदशापविमोचनमत्रिमहर्षिकृतताम्रपर्णीस्तुतिः.
८. ताम्रपर्णी सर्वदेवतास्वरूपिणीति अगस्त्यं प्रति हयग्रीवस्य वचनम्.
९. वीरसेनराजविषयः.
१०. ताम्रपर्णीसमुद्रविवाहः.
११. बाणतीर्थादीनां महिमा.

१२. ताम्रपर्णीप्राशस्त्यं देवानां दानवैः पातालनयनं च.
१३. विप्रवनिताकादम्बरीचरितम्.
१४. ब्रह्मदेवस्तुत्या वेदानां विष्णोरानयनम्.
१५. शिखिराजचरितं धर्मदारचरितं च.
१६. अगस्त्यकृतशिवस्तुतिः.
२७. अगस्त्येन शतानन्दशापविमोचनम् अनेकतीर्थमहिमा च.
१८. अगस्त्यकृतप्रकारान्तरशिवस्तुतिः.
१९. इन्द्रकीलपर्वतमहिमा.
२०. वेदान्तविषयः.
२१. ताम्राकृतशिवस्तुतिः.
२२. ताम्रासमीपबहुतीर्थमहिमा.
२३. वैजयन्तजयन्तचरित्रम्.
२४. पक्षिद्विजसूनुवृत्तान्तः.
२५. भानुचित्तोपाख्यानम्.
२६. ताम्रातीर्थप्रभावः.
२७. वसुमनोनामनृपवृत्तान्तः.
२८. ताम्रातीर्थप्रभावः.
२९. काश्यपकृतशिवस्तुतिः तस्य साङ्ख्यशास्त्रं कुर्वित्यनुग्रहश्च.
३०. दीपतीर्थमाहात्म्यम्.
३१. अगस्त्यशिवशर्मसंवादः अगस्त्यस्तुतिश्च.
३२. गजेन्द्रमोक्षः.
३३. दुर्गातीर्थप्रशंसा.
३४. मणिग्रीवकथा.
३५. मणिग्रीवशापमोचनम्.
३६. सोमशापमोचनम्.
३७. नादाम्बुजक्षेत्रे विष्णुपूजनात् बादरायणस्य ब्रह्मज्ञानप्राप्तिः.

३८. वेदव्यासाय नारायणकृतवरानुग्रहः.

३९. रोमशपक्षिसंवादः.

४०. प्रसादचन्द्रनागराजवृत्तान्तः.

४१. ताम्रासमीपतीर्थान्तरमहिमा.

४२. दुर्वाससा शिवलिङ्गप्रतिष्ठापनम् , तत्कृतसरस्वतीशापश्च.

४३. प्रवालमञ्जरीवृत्तान्तः.

४४. बलिधिकृतदानवजयः.

४५.

४६. कुम्भाटकचरित्रम्.

४७. हारीतकृतताम्रास्नानादि.

४८—५०.

५१. ज्योतिर्वनमहिमानुवर्णनम्.

५२—५५.

५६. विष्णुवनमहिमा.

५७—६३.

६४. ताम्रासागरसङ्गमुखमाहात्म्यवर्णनम्.

No. 2431. तीर्थप्रशंसा.

TĪRTHAPRAŚAṀSĀ.

Substance, palm-leaf. Size, 9⅛ × 1¼ inches. Pages, 14. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Begins on fol. 6*b*. The other works herein are Malhaṇastava 1*a*, Bhramarāmbikāpūjākrama 13*b*

This is a portion of the Skānda-Purāṇa and forms the 32nd Adhyāya of the Śrīśailakhaṇḍa in the Sanatkumārasaṁhitā.

Beginning :

ईश्वर उवाच—

इतः परं प्रवक्ष्यामि शृणु गौरि गुणोन्नते ।
तीर्थं सर्वोत्तमं दिव्यमव्ययं फलदायकम् ॥

तस्याः श्रीभ्रमराम्बायाः करुणालम्बनात्मनः ।
ईशानदिशि विख्यातं सेवितं मुनिभिस्सुरैः ॥

End :

देव(:)कोऽपि दयानिधिर्दुरितभिद्भिल्लाकृतिः फुल्लद-
ग्धारैः साकमुदञ्चयन्भुजप(ब)लं क्रोडप्रभेताः(त्ता)पुरः ।
प्रा(पा)र्थेनाहितसङ्गरस्स्वयमदाद्यस्य स्ववाञ्छाफलं
सोऽयं श्रीगिरिमल्लिकार्जुनमहादेवः प्रसन्नोऽस्तु मे ॥

Colophon :

इति श्रीस्कान्दे महापुराणे सनत्कुमारसंहितायां श्रीशैलखण्डे उमा-महेश्वरसंवादे मल्लिकाकुण्डादितीर्थप्रशस्तिकथनं नाम द्वात्रिंशोऽध्यायः ॥

No. 2432. तीर्थाद्रिमाहात्म्यम्.

TĪRTHĀDRIMĀHĀTMYAM.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 26. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, new.

Begins on fol. 13*a*. The other work herein is Śiśupālavadha 1*a*.

Two Sargas, complete ; 3rd, incomplete.

A portion of the Rāmāyaṇarahasya. It treats of the holiness of Tīrthādri near Sētu.

Beginning :

वारणं वक्रभागेऽभिर्वा(वा)रणं प्रबलापदाम् ।
कारणं जगतां त्रातृ चारणं कलये महः ॥

श्रीभारद्वाजः—

भवता स(म्यगाख्या)तं संक्षेपाद्विस्तरादपि ।
रामायणं महापुण्यं तारकं ब्रह्मसंस्थितम् ॥

प्रकाशश्च रहस्यश्च राघवस्य महात्मनः ।
चरितं सर्वशः प्रोक्तं सर्वपापप्रणाशनम् ॥

येन संश्रुतमात्रेण नरः पापैः प्रमुच्यते ।
तद्रामचरितं मह्यं कृपया प्रोक्तवानसि ॥

ज्ञानोपदेशरूपेणामानुषस्य महात्मनः ।
अतिगुह्यानि रामस्य चरितान्युपदिष्टवान् ॥

धन्योऽस्म्यनुगृहीतोऽस्मि त्वत्प्रसादान्महामुने ।
प्र(प्रा)चेत[ा]स महायोगिन् वल्मीकोद्भवविग्रह ॥

इदानीमपि यत्किंचित् प्रष्टव्यं प्रतिभाति मे ।
रहस्येषु (च)सूक्तेषु राघवस्य ब्रवीहि भो ॥

रामनाथं प्रतिष्ठाप्य रक्षोहन्ता स राघवः ।

* * * *

अन्यानि तच्चरित्राणि कथितानि त्वया पुरा ।
तत्र तीर्थाचलस्यापि माहात्म्यं सूचितं किल ॥

तद्विस्तरेण कथय मयि कारुणिको भव ।
मादृशां गुरुभक्तानां त्वादृशो गुरुसत्तमाः ॥

* * * *

Colophon :

इति श्रीवाल्मीकीये शतसहस्रिकायां संहितायां श्रीरामायणरहस्ये तीर्थाद्रिमाहात्म्ये प्रथमस्सर्गः ॥

इति श्री . . माहात्म्ये द्वितीयस्सर्गः ॥

End:

तोयराशिनिबन्धादिशुद्ध्यर्थं जगतोऽन्यथा ॥
त्वं वसिष्ठोपदेशेन शुद्धात्माध्यात्मविग्रहः ।
सुखदुःखादिभावानां स्वभावज्ञानतश्च वै ॥
त्वं वै परन्तु रामस्य विष्णोर्धनुरहोऽहरः ।
यत्कुठारः कार्तवीर्य(भुजा)वनदवानलः ॥
स त्वं शम्भोर्धनुर्जाङ्गं(र्ज्याङ्कं) यज्ञवाटे विपश्यति ।
यष्टिमिक्षोस्तु हस्तीव विभज्य व्यूढ जानकीम् ॥

No. 2433. तुलसीमाहात्म्यम्.
TULASĪMĀHĀTMYAM.

Substance, palm-leaf. Size, 19⅜ × 1⅝ inches. Pages, 14. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 6*a*. The other works herein are Kāśīmāhātmya 15*a*, Kaiśikapurāṇa 21*a*, Gītāsāra 27*a*, Agastyasaṁhitā 30*a*, Harivaṁśa (a few scattered Adhyāyas) 5 `*a*, Harivaṁśa, Āścaryaparvan, 2nd Adhyāya 1*a*, Tulasīmāhātmya 3*a*, Ūrdhvapuṇḍraślōkāḥ 4*a*, Maṅgalāṣṭaka 5*a*, Rajassvalāphala 13*a*.

Adhyāyaṣ 7 and 8 of the Gāruḍa-Purāṇa, Viṣṇudharmōttara. This treats of the holiness of the Tulasī plant.

Beginning:

तुलसीपत्रमाहात्म्यं श्रोतुमिच्छामि तत्त्वतः ।
कथं त्रिलोकनाथस्य सद्यः प्रीतिकरं भवेत् ॥

श्रीगरुडः—

श्रूयतां मुनिशार्दूल भाषितं हरिणा पुरा ।
. . . पुण्यकथनं नारदाय महात्मने ॥
ममापि हरिणा प्रोक्तं पश्चाद्देवर्षिणा च तत् ।
परमं महिमानन्तु तुलस्या विप्रसत्तम ॥

तुलसीदलमाहात्म्यं शृणुयाद्वा समाहितः ।
तेनाधीतं श्रि(श्रु)तं (तेन) तेन सर्वमनुष्ठितम् ॥

वृन्दावनं यः कुरुते तुलस्या भक्तिसंयुतः ।
अथवा कारयेदन्यैः तन्मे नि[त्]गदतश्शृणु ॥

End :

यस्तु श्रीतुलसीगन्धमाघ्राति द्विजसत्तम ।
तस्यैव नासिकारन्ध्रं प्रविश्य(श)त्यच्युतस्स्वयम् ॥

इमाञ्च तुलसीगाथां श्राद्धकाले तु यः पठेत् ।
सर्वे ते पितरस्तस्य यास्यन्ति परमां गतिम् ॥

इदं पवित्रं परमं सर्वपापप्रणाशनम् ।
यः पठेत्प्रातरुत्थाय स देवैरपि पूज्यते ॥

तुलसीकाननं यत्र त(य)त्र पद्मवनानि च ।
वसन्ति वैष्णवा यत्र तत्र सन्निहितो हरिः ॥

Colophon :

इति श्रीगारुडपुराणे विष्णुधर्मोत्तरे तुलसीमाहात्म्यं नाम अष्टमोऽध्यायः ॥

No. 2434. तुलाकावेरीमाहात्म्यम्.

TULĀKĀVĒRĪMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, 7⅜ × 1⅝ inches. Pages, 182. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Adhyāyas 1 to 3⁰, complete.

This is a portion of the Āgnēya-Purāṇa and treats of the greatness and holiness of the river Kāvēri and of the bath in it during the Tulā month.

Dated: 22nd Puraṭṭāśi in the year Śōbhakṛt.

Beginning :

धर्मवर्मापि राजर्षिर्निचुलापुरवल्लभः ।
भूयः पप्रच्छ तं नत्वा दाल्भ्यं भागवतोत्तमम् ॥

भगवन् प्राणिनस्सर्व(र्वे) केनोपायेन संपदः ।
भवन्ति पुत्रान् संप्राप्य सुखिनश्चिरजीविनः ॥

कथं स्यात्पापनिर्हारं(रः) श्रीशे भक्तिः कथं भवेत् ।
केन धर्मेण संतुष्टो भगवान् भूतभावनः ॥

प्रसीदति मनुष्याणां भुक्तिमुक्तिफलप्रदः ।
विशेषात्पापभूयिष्ठे दुराचारौ(रे)कलौ युगे ॥

पापनाशो भवेद्ब्रह्मन् महापातकिनोऽपि वा ।
एतत्सर्वं विशेषेण तव शिष्यस्य मे वद ॥

इति राज्ञा सुसंपृष्टो भगवान् भूतभावनः ।
बभाषे धर्मवर्माणं धर्मज्ञं ब्राह्मणोत्तमः ॥

दाल्भ्यः—

साधु पृष्टं महाभाग भगवद्भक्तिवर्धनम् ।
यत्ते मनोगतं श्रोतुं दिव्यां विष्णुकथां शुभाम् ॥

* * * *

विशेषात्कतिचिद्वक्ष्ये शृणुष्वावहितो नृप ।
तुलायां मकरे मेषे प्रातस्स्नायी सदा भवेत् ॥

ब्रह्मचारी हविर्भोजी सर्वपापैः प्रमुच्यते ।
कावेर्यान्तु तुलामासे यस्स्नायादुक्तलक्षणः ॥

तस्य पापानि सर्वाणि नश्यन्तीति किमद्भुतम् ।
अपि वा नियमानेतानाश्रितस्सह्यजाजले ॥

स्नातो यदि तुलामासे सोऽपि पापैर्विमुच्यते ।

End:

अहो विचित्रं माहात्म्यं कावेर्याः श्रुतिगोपितम् ।
श्रावितास्स्म महाभाग भवाब्धेता(स्ता)रिता वयम् ॥
पावनाश्च वयं श्रीमन् कावेरीपुण्यवैभवैः ।
कृतार्थास्स्म महाभाग तपो नः किमतः परम् ॥
इति प्रसन्नाननरीरजा मुदा
ते शौनकाद्या मुनयो मुमुक्षवः ।
हरेश्चरित्रश्रवणोत्सवोस्सु(त्सु)का
गन्धाक्षताद्यैः पुनरभ्यपूजयन् ॥

Colophon:

इत्याग्नेयपुराणे तुलाकावेरीमाहात्म्ये त्रिंशोऽध्यायः ॥

No. 2435. तुलाकावेरीमाहात्म्यम्.

TULĀKĀVĒRĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $14\frac{1}{5} \times 1\frac{1}{4}$ inches. Pages, 312. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

In the middle many leaves are lost.

Complete.

Same work as the above.

No. 2436. तुलाकावेरीमाहात्म्यम्.

TULĀKĀVĒRĪMĀHĀTMYAM.

Substance, palm-leaf Size, $14\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 273. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Haridrānadī-māhātmya 138*a*.

No. 2437. तुलाकावेरीमाहात्म्यम्.
TULĀKĀVĒRĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 116. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the 16th Adhyāya.

No. 2438. तुलाकावेरीमाहात्म्यम्.
TULĀKĀVĒRĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 206. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete in 28 Adhyāyas.

Same work as the above.

The MS. is dated: Friday, the 8th of Aippaśi in the year Dundubhi. The scribe's name is given as Marutalam Vēṅkaṭasubbayyan.

No. 2439. तुलाकावेरीमाहात्म्यम्.
TULĀKĀVĒRĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 76. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Brahmasūtra 39*a*. Adhyāyas 4 to 13, complete; 14th, incomplete.

Same work as the above.

No. 2440. तुलाकावेरीमाहात्म्यम्.
TULĀKĀVĒRĪMĀHĀTMYAM.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{5}{8}$ inches. Pages, 249. Lines, 22 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Adhyāyas 1 to 45, complete.

A portion of the Brahmavaivarta-Purāṇa.

Beginning:

ब्रह्मकैवर्तम्—तुलाकावेरीमाहात्म्यम्.

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

देववर्मा—

नानाविधांस्तथा देशान्नानाजातिसमन्वितान् ।
नानाधर्मसमायुक्तान् नानाचारसमन्वितान् ॥
मुनेऽहं भवता प्रोक्तानाश्रमान् सुबहूनिह ।
देशे देशे विचित्राणां तीर्थानां सरितामपि ॥

* * * *

श्रवणाभ्यां यथाकामं शुश्रूषा जायते पुनः ।
सह्यभूधरसम्भूता कावेरीति महानदी ॥
सद्यः पापहरा नृणामभीष्टफलदायिनी ।
तुलामासे विशेषेण मोक्षदात्री निमज्जताम् ॥

* * * *

साध्वी सर्वहिते रता निजगुणैस्सर्वप्रिया सज्जनैः
सद्भिस्साधुभिरीडिता शिवकथास्तोत्रेषु बद्धादरा ।
नाथप्रीतिविवर्धिनी कुचनता पूर्णेन्दुतुल्यानना
कालक्षेपमतिप्रसन्नहृदा(दया) चक्रेऽनवद्याप्युमे ॥

इति ब्रह्मकैवर्ते तुलाकावे(री)माहात्म्ये प्रथमोऽध्यायः ॥

End:

इत्थं श्रुत्वा धर्मजालं वर्षे वर्षे कृतादरौ ।
तुलास्नानरतो भूत्वा नीत्वा पापानि (च)क्षयम् ॥
त्यक्त्वा यामीया(र्या)तनाश्च जग्मतुर्लोकमुत्तमम् ।
तस्मात्त्वया मया चापि मायूरे मुक्तिदे स्थले ॥

तुलामासे च संप्राप्ते कावेर्यामुदये रवेः ।

* * * *

ये शृण्वन्ति ममाध्यायं ये शृण्वन्ति समाहिताः ।
ते तु मुक्तिं प्रयान्ति स्म भुक्त्वा भोगान्न संशयः ॥

Colophon :

इति ब्रह्मकैवर्ते महापुराणे तुलाकावेरीमाहात्म्ये पञ्चचत्वारिंशोऽध्यायः ॥

No. 2441. तोताद्रिमाहात्म्यम्.

TŌTĀDRIMĀHĀTMYAM.

Substance, palm-leaf. Size, 12½ × 1⅜ inches. Pages, 120. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete in 10 Adhyāyas.

This is a portion of the Brahmāṇḍa-Purāṇa and treats of the holiness of the shrine at Tōtādri, *i.e.*, Vānamāmalai, a village in the Tinnevelly district of the Madras Presidency. This Māhātmya is said to have been taught by Kṛṣṇa to Arjuna.

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णञ्चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥
विशुद्धविज्ञानघनस्वरूपं
विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये ॥

* * * *

काश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च सूतं पप्रच्छुरादरात् ॥
मुने कथय पुण्यानां क्षेत्राणामुत्तमं पुनः ।

सूतः—

वेदव्यासं मुनिश्रेष्ठं प्रणिपत्य शुकः पुरा ॥
माहात्म्यं तोतशैलस्य कथयस्व यथातथम् ।

श्रीवेदव्यास उवाच—

कृष्णद्वैपायनो व्यासः शुकाय निजसूनवे ॥
श्रीमत्तोताद्रिमाहात्म्यं कथयामास तत्त्वतः ।
प्रस्थितस्तीर्थयात्रार्थं पाण्डुपुत्रोऽर्जुनः पुरा ॥
प्रसादसुमुखं कृष्णं प्रणिपत्येदमब्रवीत् ।
भगवन् पुण्डरीकाक्ष शरणागतवत्सल ॥
ब्रूहि क्षेत्राणि पुण्यानि तीर्थयात्रोद्यतस्य मे ।

श्रीकृष्ण उवाच—

अहोबिलं वेङ्कटाद्रिं सिंहाद्रिं करिभूधरम् ॥
घटिकाद्रिञ्च तोताद्रिं वक्षारण्यं सुपावनम् ।
श्रीमुष्णं कुम्भघोणञ्च श्रीरङ्गक्षेत्रमुत्तमम् ॥

* * * *

अर्जुन उवाच—

इमानि श्रुतपूर्वाणि क्षेत्राणि धरणीतले ।
श्रीमत्तोतगिरेः पुण्यमाहात्म्यं वद मेऽधुना ॥

श्रीकृष्ण उवाच—

श्रीमत्तोताद्रिमाहात्म्यं कथयामि तवाद्भुतम् ।
श्रोतॄणां सर्वफलदं समाहितमनाश्शृणु ॥

End:

रुद्र उवाच—

इति तोताद्रिमाहात्म्यं गुह्यानां गुह्यमुत्तमम् ।
श्रुत्वा पराशरमुखात्पुण्डरीको महामुनिः ॥

स्वयंव्यक्तस्थलानान्तमष्टानामुत्तमं हरेः ।
तोताद्रिमञ्जसा सद्यश्चतुस्तीर्थ्यौ समाप्लुतः ॥

तत्र तांश्चतुरो देवान् सेवमानो निरन्तरम् ।
उवास सुचिरं कालं कृतार्थेनान्तरात्मना ॥

य इदं तोतशैलस्य माहात्म्यं गुह्यमुत्तमम् ।
संकीर्तयेद्वा लिख्येद्वा श्रावयेच्छृणुयादपि ॥

सर्वकामप्रदा लक्ष्मीः स्थिरा भवति तद्गृहे ।

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षेत्रकाण्डे पराशरपुण्डरीकसंवादे श्रीमत्तोताद्रिमाहात्म्यं नाम दशमोऽध्यायः ॥

विलम्ब्यभिधवत्सरे मधुजघन्यमासे शुभे
वलक्षगरुति क्षमावरपुरे हरेर्वासरे ।
. . . कुलवत्सगोत्रजरमानिवासेन सः
समाप्तिमगमन्महान् लिखिततोतभूभृद्भगः ॥

No. 2442. तोताद्रिमाहात्म्यम.

TŌTĀDRIMĀHĀTMYAM.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 124. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Complete.

Same work as the above.

No. 2443. देवाङ्गदचरित्रम्.
DĒVĀṄGADACARITRAM.

Pages, 74. Lines, 22 on a page.

Begins on fol. 350*a* of MS. described under No. 118.

Adhyāyas 6 to 19, complete.

A portion of the Brahmāṇḍa - Purāṇa; treats of the history of Dēvāṅgada and his descendants.

Beginning :

समस्तविघ्नविच्छेदकारणं वारणाननम् ।
भजेत्सज्जनसन्तापवारणं तोरणध्वजम् ॥
वाणीं वीणाकरां वन्दे वन्दारुजनवत्सलाम् ।
शुम्भन्मन्मथकुम्भीशकुम्भदम्भहरस्तनाम् ॥
नैमिशीया महात्मानो मुनयश्शंसि(स्संशि)तव्रताः ।
शौनकाद्याः पाणिपुटैः स्तूयमानाः कृपानिधिम् ॥
पुरतः प्रश्रितं पीठे निषण्णं योगिनां वरम् ।
पौराणिकोत्तमं सूतं पप्रच्छुः कुशलात्मनः ॥

ऋषयः—

सूत सूत महाभाग सर्वशास्त्रार्थकोविद ।
सर्वतत्त्वविधानज्ञ प्रज्ञाविज्ञानसागर ॥

* * * *

कारणेन इव प्रीतिं कृत्वा व्यासो महामुनिः ।
पुराणं पञ्चमं वेदं प्रसादादुक्तवान्मुनिः ॥
श्रोतुमिच्छामि तत्सर्वं युष्मद्वदनपङ्कजात् ।
पृच्छासु विचिकित्सा च सम्यगुच्चा(त्सा)रित(ा)त्वया ॥
विचित्राश्च कथाः पुण्याः त्वयावक्तव्य(यथावद्वक्तु)मर्हसि ।

End :

पाञ्चालं टङ्कणञ्चैव विचरन् हास्यकोविदः ।
राजपुत्रान् तोषयित्वा संपाद्य बहुलन्धनम् ॥

गजानाश्वंच(नश्वांश्च) शिबिका[न्] रत्नहारान् मनोहरान् ।
ग्रामान् पशूंश्च संतुष्टो वितीर्य बहुलं धनम् ॥
शिष्येभ्यो दासदासीनां शतैर्युक्तं स्वमन्दिरम् ।
शोभयन् भूषितैः पुत्रैः पौत्रैर्युक्तस्सदार्चयन् ॥
शङ्करं शाश्वतं शान्तं चिन्तायोगाच्छिवाज्ञया ।
कैलासनगरे शम्भुसमीपं प्राविशन्मुदा ॥

Colophon:

इति ब्रह्माण्डपुराणे उत्तरभागे देवाङ्गदचरित्रे देवसाल्वावतारकथनं नाम एकोनविंशोऽध्यायः ॥

No. 2444. देवीमाहात्म्यम्.
DĒVĪMĀHĀTMYAM.

Substance, paper. Size, 9¾ × 7½ inches. Pages, 110. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 71*a*. The other works herein are: Bagalākalpa 1*a*, Lalitāsahasranāmastōtra 126*b*, Śrīcakrapūjāvidhāna 151*a*.

Complete.

This is a portion of the Mārkaṇḍēya-Purāṇa, and treats of the greatness of Dēvī or Kālī, principally describing the destruction of the eight Asuras by Dēvī in her incarnations as Kālī, Lakṣmī and Sarasvatī. The Māhātmya proper consists of 13 Adhyāyas, and is generally followed by five Adhyāyas, three of which contain Argala, Kīlaka and Kavaca, and two contain Rahasyatraya and Sūktatraya. The work is also called Saptaśatī as it is made up of about 700 stanzas But the MS. under notice has the three Adhyāyas containing Argala, &c. in the beginning, and counts three Adhyāyas in Rahasyatraya alone; it omits altogether the Sūktatraya, but adds five more Adhyāyas on rules relating to the conduct of the worship of Dēvī. The subject-matter of the chapters as found in the colophon is as follows—

१. दुर्गार्गळम्.
२. लक्ष्मीकीलकम्.
३. सरस्वतीकवचम्.

१. मधुकैटभवधः.
२. महिषासुरसैन्यवधः.
३. महिषासुरवधः.
४. महिषासुरवधप्रयुक्तदेवतास्तोत्रम्.
५. देवीदूतसंवादः.
६. धूम्रलोचनवधः.
७. चण्डमुण्डवधः.
८. रक्तबीजवधः.
९. निसुम्भवधः.
१०. सुम्भवधः.
११. देवतास्तुतिः.
१२. भगवतीवाक्यम्.
१३. सुरवैश्ययोर्वरप्रदानम्.
१४. (प्रधान)रहस्यम्.
१५. (वैकृति)रहस्यम्.
१६. (मूर्ति)रहस्यम्.
१७. (मन्त्र)रहस्यम्.
१८. बीजोद्धारविधिः.
१९. पूजाप्रकरणम्.
२०. महालक्ष्मीपूजाविधानम्.
२१. मन्त्ररहस्यम्.

Beginning :

अस्य श्रीदेवीमाहात्म्यचण्डिकासौभाग्यसप्तशतीस्तोत्रमन्त्रस्य मार्कण्डेयब्रह्मविष्णुमहेश्वरा ऋषयः, गायत्र्यादिनानाछन्दांसि, महाकालीमहालक्ष्मीसरस्वत्यः प्रधानदेवताः.

* * * *

अर्गलं कीलकं चादौ पठित्वा कवचं न्यसेत् ।
जपेत्सप्तशतीं पश्चात् सर्वसिद्धिर्भविष्यति ॥
अर्गलं दुरितं हन्ति कीलकं फलदं तथा ।
कवचं रक्षाते प्रायश्चण्डिकात्रितयं यजेत् ॥

* * * *

देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ।
लभते परमं रूपं शिवेन समतां व्रजेत् ॥

Colophon:

इति श्रीहरिहरविरचितं चण्डिकाकवचं संपूर्णम् — तृतीयोऽध्यायः ॥

* * * *

अस्य श्रीप्रथमचरितस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीभद्रकाली देवता, नन्दा शक्तिः, रक्तदन्तिका बीजम्, अग्निस्तत्त्वं, यजुर्वेदस्वरूपं, महाकालीप्रीत्यर्थे जपे विनियोगः, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः.

* * * *

सावर्णिस्सूर्यतनयो यो मनुः कथ्यते बुधैः ।
निशामय तउ(दु)त्पत्तिं विस्तराद्वदतो मम ॥
महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥
स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ।
सुरतो(थो) नाम राजाभूत् समस्ते क्षितिमण्डले ॥

* * * *

सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ।
सा विद्या परमा मुक्तेः हेतुभूता सनातनी ॥
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ।

राजोवाच—

भगवन् का हि सा देवी महामायेति यां भवान् ॥
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ।
यत्स्वभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ।

ऋषिरुवाच—

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥

तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ।
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥

End:

मार्कण्डेय उवाच—

इति दत्वा तयोर्देवी यादाभिह्(यथाभिल)षितं प(व)रम् ।
बभूवान्तर्हिता सदो(द्यो) भक्त्या ताभ्यामभिष्टुता ॥
एवं देव्या वरं लब्ध्वा सुरथ(:)क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥

Colophon:

इति मार्कण्डेये सावर्णिके मन्वन्तरे श्रीदेवीमाहात्म्ये सुरथवैश्ययोर्वरप्रधा(दा)नन्ना(नं ना)म त्रयोदशोऽध्यायः ॥

राजोवाच—

भगवन्नवतारा णां(मे) चण्डिकायास्त्वयोदिताः ।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥

End:

इत्येता मूर्तयो देव्या व्याख्याता वसुधाधिप ।
जगन्मातुश्चण्डिकायाः कीर्तिता(:)कामधेनवः ॥
इदं रहस्यं परमं न वाच्यं कस्य चित्त्वया ।
आख्यातं दिव्यमूर्तीनामधिष्ठानानि ते स्वयम् ॥

Colophon:

इति मार्कण्डेये सावर्णिके मन्वन्तरे देवीमाहात्म्ये मूर्तिरहस्यं नाम षोडशोऽध्यायः ॥

देवीमाहात्म्यं संपूर्णम् ॥

जय चन्द्रकभूषाढ्ये जय चन्द्रकलाधरे ।
जय पूर्णचन्द्रवदने जय वाञ्छाफलप्रदे ॥

End:

पात्रं नास्त्रीषु संपूज्य ध्यायेद्देवीं ततो बुधः ।
एवं रूपं हृदि ध्यात्वा पिण्डी स्वपदनंकला ॥

नीकेलोत्माह्वनंसस्य(?)

Colophon:

इति श्रीमार्कण्डेयपुराणे सूर्यसावर्णिकमन्वन्तरे देवीमाहात्म्ये मन्त्ररहस्यं नाम एकविंशोऽध्यायः ॥

No. 2445. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $8\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 126. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in 13 + 2 + 3 Adhyāyas. This copy contains the Pūrvāṅga to the Purāṇa.

Same work as the above.

No. 2446. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $10\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 50. Lines, 10 on a page. Character, Nandīnāgari. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Tricakalpa 26*a*. Ślōkas 10 to 587 containing the 13 Adhyāyas.

No. 2447. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, paper. Size, $10\frac{5}{8} \times 8\frac{5}{8}$ inches. Pages, 103. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 96*b*. The other works herein are Sāṅkhyāyanatantra 1*a*, Lalitāsahasranāmastōtra 64*a*, Śrīca krapūjāvidhāna 81*a*.

Complete in 3 + 13 + 3 Adhyāyas.

Same work as the above.

No. 2448. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, paper. Size, $8\frac{1}{2} \times 5\frac{3}{8}$ inches. Pages, 164. Lines, on a page. Character, Telugu. Condition, good. Appearance old.

Adhyāyas 3 + 13 + 3 ; and again another copy of the work containing Adhyāyas 3 + 2 of the Māhātmya proper.

Same work as the above.

No. 2449. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $8\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 128. Lines, on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Śivakavaca 65*a*.

First leaf is lost.

Adhyāyas 1 to 13 of the Māhātmya proper; the Adhyāya on the Rahasyatraya breaks off with the 15th stanza.

No. 2450. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, $7\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 27. Lines, 7 on a page. Character, Malayāla. Condition, fair. Appearance, old.

Adhyāyas 9 to 12 of the Māhātmya proper.

Same work as the above.

No. 2451. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, $9\frac{3}{4} \times 2\frac{3}{8}$ inches. Pages, 36. Lines, 10 on a page. Character, Nandināgarī. Condition, fair. Appearance, old.

Adhyāyas 1 to 4, complete ; 5th incomplete, of the Māhātmya proper.

No. 2452. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, $7\frac{5}{8} \times 1\frac{7}{8}$ inches. Pages, 127. Lines, 13 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains 3 + 13 + 3 + 8 Adhyāyas, the last eight treating of Dēvīpūjā.

Begins on fol. 41*a*. The other works herein are : Kulārṇava 7, Ṛgvēdarcaḥ 105*a*, Brahmaṇōgnisaṁvidhānasūktamantra 106*a*, Taṇavakalpa 109*a*, Lalitāsahasranāmāvali 144*a*.

After the 24th Adhyāya, Pūjāvidhāna is added.

No. 2453. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $7 \times 1\frac{1}{4}$ inches. Pages, 245. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Adhyāyas 1 to 13 of the Māhātmya proper with Navāṅga.

No. 2454. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, palm-leaf. Size, 13⅞ × 1½ inches. Pages, 68. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 2*a*. The other work herein is Dēvīmānasikapūjā 1*a*.

Adhyāyas 3 + 13 + 3 with Navāṅga.

Same work as the above.

No. 2455. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Pages, 74. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 2409.

Adhyāyas 3 + 13 + 1 with Pūrvāṅga.

Complete.

Same work as the above.

Three leaves before the last leaf are lost; and hence Adhyāyas 15, 16, 17 and a portion of 18 are wanting.

No. 2456. देवीमाहात्म्यपूर्वाङ्गः.

DĒVĪMĀHĀTMYAPŪRVĀṄGAḤ.

Substance, palm-leaf. Size, 10½ × 1⅜ inches. Pages, 16. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Kārtavīryārjunakavaca 9*a*, Tripurasundarīṣōḍaśīmantra 18*a*, Navākṣarīmantra 19*a*.

Incomplete.

No. 2457. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Pages, 113. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 537.

Complete.

Adhyāyas 1 to 3 + 1 to 13 + 3 + 6 from the Mārkaṇḍēya-Purāṇa.

The MS. is dated: Thursday, the 5th of Āṣāḍha-Śuddha in the year Bhava. The scribe's name is given as Pāpayyaliṅga, son of Mājēṭi Sarvēśaliṅga.

No. 2458. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Pages, 80. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 235.

Adhyāyas 1 to 3 + 1 to 13 + 3 + 5.

Same work as the above.

No. 2459. देवीमाहात्म्यनवाङ्गः.

DĒVĪMĀHĀTMYANAVĀṄGAḤ.

Substance, palm-leaf. Size, $8\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 28. Lines, 10 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is Svarṇākarṣaṇa bhairavamantra 14*b*.

Complete.

This describes the 9 items of worship to be gone through before commencing a religious reading of the Dēvī-Māhātmya; they are ध्यान. आवाहन, नाम, अर्गल, कीलक, कवच, दल, हृदय, and न्यास.

Beginning:

अस्य श्रीदेवीमाहात्म्यस्य त्रयोदशाध्यायोक्तानं(नां) देवतानां मध्ये महिषासुरमर्दिनी प्र(धान)देवता, धूम्रलोचनचण्डमुण्डरक्तबीजसुम्भनिसुम्भमर्दिनी प्रत्यधिदेवता.

* * * *

ब्रह्माणी वदनेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी ऐन्द्री च वज्रायुधा
चामुण्डा सगणेशरुद्रसहिता रक्षन्तु मां मातरः ॥

End:

इदन्तु कवचं पुण्यं देवानामपि दुर्लभम् ॥
यो नरः पठते नित्यं त्रिसन्धि(न्ध्यं) श्रद्धयान्वितः ।
देवी प्रीता भवेत्तस्य त्रैलोक्येष्वपराजितः ॥

* * * *

देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥
तत्फलं सममा(वा)प्नोति यावदाभूतसंप्लवम् ।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥

No. 2460. देवीमाहात्म्यम्.

DĒVĪMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, $6\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 225. Lines, 7 on a page. Character, Malayāla. Condition, injured. Appearance, old.

Contains Adhyāyas 28, and 75 to 81 in the Varāhapurāṇa; Adhyāyas 8, 9, 19 to 25 in the Skānda Purāṇa; and Adhyāyas 84 to 86 of the Mārkaṇḍēya Purāṇa - these last corresponding to Adhyāyas 13 to 15 of the Dēvīmāhātmya.

The subject-matter of the chapters is as follows:—

Varāha: Adhyāya 28—देव्युत्पत्तिः वेत्रासुरवधश्च; 75—रुद्रमहिमा त्रिमूर्तिनिर्णयश्च; 76—रुद्रमहिमा सृष्टिस्तवः; 77—महिषासुरवधः; 78 to 81—रुद्रमहिमा. Skānda: Adhyāya 8, 9, 19 to 21—कात्यायनीसम्भवः (Adhyāya 21 is incomplete); 22, 23—निसुम्भवधः (22 wants beginning); 24, 25—कौशिक्यभिषेकः ॥

Beginning:

वराहपुराणस्थं देवीमाहात्म्यम्—

प्रजापालः—

कथं माया समुत्पन्ना दुर्गा कात्यायनी शुभा ।
आदिक्षेत्रे स्थिता सूक्ष्मा पृथक् मूर्त्या व्यजायत ॥

* * * *

पुनर्ब्रह्मान्वये जातस्सिन्धुद्वीपेति संज्ञितः ।
स तेपे परमं तीव्रं शक्रवैरमनुस्मरन् ॥
ततः कालेन महता नदी वेत्रवती शुभा ।
मानुषं रूपमास्थाय सालङ्कारं मनोहरम् ॥
आजगाम यतो राजा तेपे परमकं तपः ।
तां दृष्ट्वा रूपसंपन्नां राजान्त(:) क्षुब्धमानसः ॥
उवाच कासि सुश्रोणि तत्त्वं कथय भामिनि ।

नदी—

अहं जलपतेः पत्नी वरुणस्य महात्मनः ॥
नाम्ना वेत्रवती पुण्या त्वामिच्छन्ती समागता ।

* * * *

एवमुक्तस्तया राजा साभिलाषोपयुक्तवान् ॥
तस्यास्सद्योऽभवत्पुत्रो द्वादशार्कसमद्युतिः ।
वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत् ॥

End:

यावत्यस्ता महाशक्तयस्तावद्रूपाणि शङ्करः ।
कृतवांस्तांश्च भजते पतिरूपेण सर्वदा ॥
यश्चार(ा)धयते तास्तु तस्य रुद्रे तु तोषिते ।
सिध्यते (न्त्ये)तास्सदा देव्यो मन्त्रिणो नात्र संशयः ॥

Colophon:

इति श्रीवराहपुराणे रुद्रमाहात्म्ये एकाशीति[शत]तमोऽध्यायः ॥

स्कान्दपुराणस्थं देवीमाहात्म्यम्—

सनत्कुमारः—

या कण्ठनालकबलीकृतकालकूट-
च्छायेव विष्फुरति वक्षसि चन्द्रमौलेः ।
सा मे समस्तदुरितानि कटाक्षमाला
तुहि(दूरी)करोतु तुहिनाचलकन्यका या ॥

* * * *

बिभ्रती शिरसा देवी स्फुरितेन्दुसमत्विषा ।
उत्पन्नमात्रा गायत्री पुरा इव तपस्विभिः ॥
पार्वत्याः पार्श्वमागम्य तस्थौ प्रह्वाञ्जलिर्नता ।
तां करेणाथ संमृज्य देव्युत्पलसमत्विषा ॥
तन्वीं मधुरया वाचा प्रोवाच गिरिजाङ्गजाम् ।
ममाङ्गकोशात् संभूता कौशिकीति परिश्रुता ॥
भविष्यसि महाभागे कन्या कात्यायनीति च ।
आभ्यामेव परं द्वाभ्यां नामभ्यां ख्यातिमेष्याति(सि) ॥

End:

सा तु पिञ्छध्वजा देवी भूतैर्नानारसै(र)पि ।
अभिषेकमिमं प्राप्य विन्ध्ये निवसतेऽव्यया ॥

स्वस्रा (सुः)सुरेन्द्रश्शुभया(स्य शुभा)सुरघ्न्या-
श्शृण्वन्ति तस्याः पुरतोऽभिषेकम् ।
ते पुत्रपौत्राभिह(दियु)ता धनाढ्याः
सुखानि विन्दन्ति परत्र हेतोः ॥

Colophon :

इति श्रीमत्स्कान्दपुराणे कौशिक्य[ा] भिषेको नाम पञ्चविंशोऽध्यायः ॥

No. 2461. पञ्चक्रोशमाहात्म्यम्.

PAÑCAKRŌŚAMĀHĀTMYAM.

Substance, paper. Size, $9\frac{1}{2} \times 4\frac{1}{8}$ inches. Pages, 39. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete in 5 Adhyāyas.

This is a portion of the Brahmavaivarta-Purāṇa and treats of the holiness of Kāśī and the surrounding regions within a radius of 5 Krōśas. It is said to have been taught by Kapila to the Siddhas as it had been formerly related by Mahādēva to Pārvati. Appears to be different from the work described on page 28 of Aufrecht's Bodleian Library Catalogue.

Beginning :

श्रीकपिल उवाच—

एवं सिद्धाः काशिकायां वसेद्यः
सर्वैर्धर्मैस्संयुतस्सोऽतिवन्द्यम् ।
तस्माद्धर्मास्सततं सिद्धिभूमौ
संसेव्याः स्युः पापकं नाल्पमत्र ॥
ये ये धर्मा मानवैस्संप्रयुक्ताः
काश्यान्ते तान्मोक्षसिद्धिन्नयन्ति ।

तस्मात्सिद्धिः साधयेदात्मकार्यं
सद्भिश्शास्त्रैः श्रद्धया त्यागयोगैः ॥

काश्यां कृतानां पापानां पुण्यानां वा समृद्धयः ।
भवन्ति सततं नूनं सुक्षेत्रे ह्युप्तबीजवत् ॥

सिद्धा ऊचुः—

देवदेवारविन्दाक्ष साङ्ख्ययोगप्रवर्तक ।
कथं मुच्येत मनुजः काश्यामेव कृतैरघैः ॥
मोक्षं प्राप्नोति च कथं कथं वा जीवने सुखम् ।
आनन्दकानने ह्यस्मिन् कथमानन्दभाग्भवेत् ॥

कपिल उवाच—

इदमेव पुरा पृष्टः पार्वत्या भगवान्भवः ।
पापनाशं धर्मवृद्धिरविलम्बेन मोचनम् ॥

पार्वत्युवाच—

दीनानाथैकशरण देवदेव दयानिधे ।

* * * *

पापं कृत्वा मृता ये च तेषां मुक्तिः कथं भवेत् ।
कृपया देव(वद)देवेश प्रायश्चित्तमशेषतः ॥

महादेव उवाच—

शृणु पार्वति वक्ष्यामि यद्गोप्यं मम सर्वतः ।
पुण्यवद्भिः पापवद्भिः कर्तव्यं काशिवासिभिः ॥
न कोऽपि दृष्टो मनुजः विना पापं शरीरभाक् ।

End :

तथा साहसमालम्ब्य काशीमनुगतो भवेत् ॥
गुरुद्रोहपरो यस्तु विप्रद्रोहपरस्तथा ।

न तस्य काशी सिद्ध्येत बहुभिस्साधनैर्युता ॥
क्षेत्रसन्न्यासिनामेवं क्रमः प्रोक्तो मयानघे ।
प्रदक्षिणायास्तु महान् महापापहरः परः ॥

Colophon:

इति श्रीब्रह्मवैवर्ते महापुराणे तृतीयविभागे पञ्चक्रोशीमहिमावर्णनं नाम पञ्चमोऽध्यायः ॥

वाराणसीप्रसादस्य नियोगेन प्रयत्नतः ।
काशीसंस्कृतमुद्रायामङ्कितोऽयं शिलाक्षरैः ॥

No. 2462. पञ्चक्रोशमहिमा काशीगीता.

PAÑCAKRŌŚAMAHIMĀ *or* KĀŚĪGĪTĀ.

Substance, palm-leaf. Size, 18½ × 1⅜ inches. Pages, 29. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Prakaraṇas 1 to 5, complete. Same work as the above.

The MS. is dated: Saturday, the 3rd of Mārgaśira-śuddha in the year Tāraṇa.

No. 2463. पञ्चनदक्षेत्रमाहात्म्यम्.

PAÑCANADAKṢĒTRAMĀHĀTMYAM.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 246. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

This describes in 30 Adhyāyas the holiness of the Pañcanadakṣētra, known as Tiruvaiyār, which is a village in the Tanjore district of the Madras Presidency. Sumantu is made to relate it to king Dēvavarman.

Beginning:

वन्दे महेश्वरं शम्भुं विघ्नेशं षण्मुखं गुरुम् ।
गणेशं नन्दिमुख्यांश्च शिवभक्तान् महामुनीन् ॥

सूतः—

देववर्माभिधो राजा सूर्यवंशसमुद्भवः ।
सुमन्तुं परिपप्रच्छ शिवभक्तं द्विजोत्तमम् ॥

(देवव)र्मा—

उक्तं समस्तं भवता सुमन्तो तीर्थमुत्तमम् ।
कावेर्या महिमा प्रोक्ता वृद्धाद्रीशस्य वैभवम् ॥
मायूरक्षेत्रमाहात्म्यं विस्तरेण त्वयोदितम् ।
इदानीं श्रोतुमिच्छामि श्रीमत्पञ्चनदस्य वै ॥
